**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : **www.gisrrj.com**
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 5 | ISSN : 2582-0095

# शैवागमेषु पवित्रोत्सवविधिस्वरूपसंक्षेपः

डॉ. पि. नीलकण्ठम्
सहायाचार्यः,शैवागम विभागः, श्रीवेङ्कटेश्वर वेद विश्वविद्यालयः, तिरुपति, आन्ध्रप्रदेशः

**Article Info**

**Publication Issue :**
September-October-2023
Volume 6, Issue 5

**Page Number :** 46-57

**Article History**
Received : 01 Sep 2023
Published : 15 Oct 2023

**उपोद्घातः** - लोकानुजिघृक्षया जीवान् उद्धदिर्षुः महेश्वरः ईशानादि पञ्चमुखेभ्यः आगमान् सस्रुजे । आगमानुसारेण निर्मिताः देवालयाः जनानां मुमुक्षूणां अत्यन्तसुलभाः मार्गाः भवन्ति । आलयेषु अर्चनादि विधिधुरीणाः नित्योत्सवादिषु ज्ञानसम्पन्नाः भवेयुः। उत्सवेषु अन्यतमस्य पवित्रोत्सवस्य जिज्ञासापि तैः अपरिहार्या न केवलं शैवागमेषु किन्तु वैखानस – पाञ्चरात्रादि सर्वासु शाखासु पवित्रोत्सवः विशेषफलप्रदायकः प्रक्रिया रूपः उपदिष्टः। दक्षिणभारते एष उत्सवः प्राचीनतया अनुष्ठीयमानोऽपि आन्ध्रदेशे तेलंगाणा प्रान्ते च देवालयेषु अवगाहनाभावेन द्रव्यालाभेन श्रद्धालोपेन वा तत्बोधक ग्रन्थसमुदायस्य अलभ्यत्वात् वा विरलतया अनुष्ठितः ।

**विशेषपदानि** - गङ्गावतारपवित्रं, वज्रायुधम्, द्रव्यहीनं, नैमित्तिकः, श्रौतकर्म, दर्शपूर्णमासौ, षडशीति, उपरागकालेषु, अणिमादिसिद्धिप्राप्तये, विधिच्छिद्रपूरणाय, चान्द्रायणं, दैवसिकानि, प्रसूनैर्वा, विष्णोःश्वापकालानान्तरं, उर्ध्वमिथुनं, क्षयमासः, सौरमाने, 141 संवस्तरेषु, मुमुक्षुभिः, गन्धपवित्रम्, खण्डतिथिं, कौशेयं, ब्राह्मणस्त्रीभिः, तत्त्वत्रयपवित्रं, केशमिश्रितानि, मण्डलेश्वरः, शुद्धपवित्रं, पवित्ररक्षा, देव्याःपृथगालयः, उद्यापनं, व्रतचरी, पूर्वङ्गं ।

**विशयः** - अघोरशिवाचार्य पद्धतौ द्वितीय भागे पवित्रोत्सवविधिः ग्रन्थलिप्यां वर्तते । तद्विशेषान् साधारण लिपिरूपेण परिवर्तितान् कृत्वा आन्ध्रदेशे शैवालयेषु पवित्रोत्सवाचरणाय एष ग्रन्थः प्रकाशितः । ततः आचरणयोगाः ततः ज्ञानसम्पादन साधनीभूताः केचन विषयाः पतित्रोत्सव सम्बन्धिनः अत्र निरूप्यन्ते । अस्मिन पत्रे 1.पवित्रशब्दार्थः 2.पतित्रोत्सवावसरः 3.पवित्रोत्सवनित्यत्व साधनम् 4.कालनियमः 5.पवित्रद्रव्याणि 6.निर्माणक्रमः 7.तत्त्वत्रय पवित्रलक्षणम् 8.गङ्गावतार पवित्रलक्षणम् 9.पवित्राधिदेवताः 10.वर्ज्यानि पवित्राणि 11.पवित्रालङ्करणम् 12.यागशाला 13.ऋत्विजां नियमाः 14.प्रयोगक्रमः 15.धारणकाल नियमाः 16.देव्यालये पवित्रोत्सवाः 17.पवित्रोत्सवफलम् 18.अकरणे प्रायश्चित्तम् 19.पवित्रोत्सव समर्पणाय प्रधानश्लोकाः मन्त्राः च

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

इत्येतेषाम् अंशानां निरुपणमत्र क्रियते

**1.पवित्रशब्दार्थः-** पूञ् पवने (1486), पूङ् - पवने (966) इति वा धातोः पुवः संज्ञायाम् (3-2-185) इति सूत्रेण इत्र प्रत्यये सार्वधातुकार्धातुकयोः (1-3-84) इति गुणे अवादेशे पवित्रम् इति रूपम्।

येनाज्यमुत्पूयते यच्चानामिकावेष्टनम् तत् पवित्रमिति संज्ञा वाचकोऽयं शब्दः कृत् वृत्या निष्पादितः। पविः वज्रायुधम् **कुशलं भिदुरं पविः** इत्यमरः । पविशब्दः लक्षणया वज्रायुधसमान दोषेषु अन्वीय पविभ्यः वज्रसमान दोषेभ्यः त्रयते इति पवित्रम् । पवि शब्द उपपदे - त्रैङ पालने इति धातोः आदेच उपदेशेऽशिति (6-1-45) इत्याकारे आतोनुपसर्गे कः (3-23) इति क प्रत्यये आतोलोप इटिच (6-4-64) इत्याकारलोपे (2-2-19) उपपदमतिङ् इति समासे पवित्रं इति रूपम् । एवं कृद्वृत्या समासवृत्या वा शुद्धिकरणं रक्षणं च पवित्रशब्दार्थो भवति । निघण्टुषु पवित्रारोपणं, पवित्रारोहणं इति नामद्वयं दृष्टम् । अर्थः तु द्वयोरपि तुल्यः वैष्णवाः नारायणादिभ्यः देवेभ्यः श्रावणमासे शुक्लपक्षे द्वादश्यां यज्ञोपवीतमिव पवित्रमर्पयन्ति । रुह धातोः प्रातिपदिकात् धात्वर्थे बहुलम् (गणसूत्रं/417) इति णिच प्रत्यये रूहः पोऽन्यतरस्यां (7-3-43) इति हकारस्य प्रकारः विकल्पतया आदेशो भवति । दर्भैः निर्मितं पवित्रं साधारणतया स्मर्यते । तत् द्विविधं 1.धारणपवित्रम् 2.उत्पवनपवित्रमिति

**धारणपवित्रम्** - दर्भद्वय युक्तं अनामिकया धार्यते ।

**उत्पवनपवित्रम्** - दर्भद्वयेण द्वादशङ्गुलप्रमाणं देवताह्वानादिषु उपयुज्यते ।

**2.पवित्रोत्सवावसरः** - पवित्रधारणया सह कृतः उत्सवः पवित्रोत्सवः इति मध्यमपदलोपि समासः । संवत्सरं नित्यनैमित्तिक अर्चनेषु क्रियमाणेषु कदाचित् दोषाः सम्भवेयुः तेन प्रत्यवायो भवति । एवं द्रव्यहीन क्रियाहीनादि दोषाणां शान्तये पवित्रोत्सवः अपरिहार्यतया अनुष्ठेयः इति आगमैः, एकमत्येन उक्तम् ।

अत्रेयं गाथा श्रूयते पवित्रः वासुकिश्च सर्पौ महेश्वरमुद्दिश्य बहुतिथं कालं तपः चेरतुः । तपसा प्रीतः महेश्वरः तौ मूर्ध्नि कण्ठे भुजयोः पवित्रमिव धारयामि इति ताभ्यां वरं ददौ इति सिद्धान्तशेखरग्रन्थे निरूपितम् ।

**3.पवित्रोत्सवनित्यत्व साधनम्** - एष उत्सवः नित्यः, काम्यः, नैमित्तिकः चेति केषाञ्चन मतम् । दोषनिवारकत्वात् विच्छिद्रपूरणं प्रायश्चित्तमिति केचिद्वदन्ति । कारणबहुत्वेपि उत्सवस्य नित्यत्वं सिद्धम्। नित्यं पूजावसाने पुष्पादिभिः समं पवित्रमपि अर्पणीयम् । प्रत्यहं पवित्रसमर्पणं असाध्यम् इति हेतोः उत्सवस्य विस्तार क्रतुत्वात् प्रतिसंवत्सरं कार्यमिति आगमादेशः । नित्यकर्मरूपेण अमावास्य - पौर्णमास्ययोः चातुर्मास्येव करणीयमग्निहोत्रं इष्टिसमूहरूपं श्रौतकर्म प्रतिवत्सरं त्रिः करणीयम् । तथापि प्रतिसंवत्सरं नित्यविधिरूपेण अनुष्ठीयते। विष्णोः स्वापकालानन्तरं पवित्रोत्सवः करणीयः इति नैमित्तिकत्वात् नित्यत्वे अव्याप्तिः **दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिदं द्विधम् (द्विधा)** । इति **षट् साहस्रिकायामुक्ते**: अव्याप्तिश्च भवति । स्नानजपादयः नित्याः अष्टमी चतुर्दशी दर्शपूर्णमासौ व्यतीपातः संक्रान्तयः अधिकमासः षडशीतिः । एवम् उपरागकालेषु द्विगुणम् अर्चनादिकं करणीयम् इति शास्त्रोक्तिः। प्रातः कालादिषु करणीयत्वेन नियतत्वात् सन्ध्यावन्दनादयोऽपि काल निमित्तत्वात् नैमित्तिकाः भवन्ति इति अतिव्याप्तिश्च ।

**पवित्रारोपणेकार्या सन्ध्या तन्निमित्ततः ।**

**तेल नैमित्तिकी प्रोक्ता नैमित्तिकमतोमतम् ।।** **2**

अणिमादि सिद्धिप्राप्तये क्रियमाणं काम्यमपि भवति । पवित्रोत्सवे काम्याभावात् अकाम्यमेव । अयं च उत्सवः सर्वपूजा विधिछिद्रपूरणाय करणीयत्वात् प्रायश्चित्तमपि न भवति ।

**सर्वपूजा विधिच्छिद्रपूरणाय पवित्रकम्** इत्यागमोक्तेः आषाढादि काले अनुष्ठीयमानतया कालाश्रितत्वात् न प्रायश्चित्तम् । अनुष्ठानभङ्गे प्रायश्चित्तं विधीयते । संवत्सरं कर्तव्यस्य उत्सवे करणीयत्वात् प्रायश्चितम् अपि न भवति ।

**आषाढादित्रये दैवादविधाय पवित्रकम् ।**

**लक्षद्वयमघोरस्य जप्त्वा चान्द्रायणं चरेत् ।।3**

पवित्रकर्मणः लोपे प्रायश्चित्ताचरणं कृत्वा पवित्रारोपणं करणीयमिति वचनात्, नित्याङ्गत्वं सिद्धम् । ततः पवित्रोत्सवः प्रायश्चित्तं न भवति ।

**नित्याङ्गः एव** - प्रत्यहं करणीयानि विद्युक्त्यानि कर्माणि नित्यानि

**स्नाने सन्ध्या तथा पूजा जपो होमश्च पञ्चमः ।**

**इति नित्यांङ्गमुद्दिष्टं पवित्रारोपणं तथा ।।4**

इति प्रमाणवाक्येन स्नानादीन् नित्यानि । नित्यान्यपि 1.दैवसिकानि 2.वार्षिकाणि इति द्विधा भवन्ति। दिवसे क्रियमाणं दैवसिकम् । वर्षे वर्षे क्रियमाणं वार्षिकम् । प्रत्यहं करणीयं दैवसिकमिति संवत्सरे सकृत्करणीयं वार्षिकमिति अर्थः । दैनिके पवित्रसमर्पण काले सूत्रप्रतिनिधित्वेन पुष्पाणि, कुशाः समर्पणीयाः । क्रियाबाहुल्यात् कदाचित् असम्पूर्णं भवेत् । तत्पूर्तये वार्षिकं करणीयम् इति द्वितीयस्यापेक्षा । नामद्वयदर्शनेपि क्रिया तुल्यरूपैव । सन्ध्यावन्दनादिष्विव दैनिके पवित्रकर्मणि लोके वार्षिकं कर्तव्यम् । अन्यथा वार्षिकः न भवति ।

**नित्योत्सवेन या पूजा तस्यास्संवत्सरोत्सवः** इति वाक्येन द्वयोः भेदः नास्ति । ततः द्वयमपि नित्याङ्गम् ।

**पवित्राकाभिः प्रसूनैर्वा कुशैर्वा परिकल्पयेत् ।**

**पवित्रं प्रत्यहं शम्भो महापुण्यचिकीर्षया ।।5**

**इति नित्यक्रियाऽख्याता शृणु नैमित्तिकी पुनः ।**

**आषाढस्य सिताग्राह्या श्रावणस्य सिताऽसिता ।।6**

श्लोकद्वये पवित्रोत्सवः नैमित्तिकः इव प्रतिभाति तथापि छिद्रपूरणाय कर्तव्यं वार्षिकं नैमित्तिकं उदाहृतम् । न तु तस्य वास्तवं नैमित्तिकत्वम् । तत् तत् कालेषु विधिरूपेण करणीयोपदेशार्थं नैमित्तिक शब्दः प्रयुक्तः । दैवसिकं नित्याङ्गमेव ।

**4.कालनियमः** - विष्णोः स्वापनकालान्तरं पवित्रोत्सवं करणीयम् । चान्द्रमानानुसारेण आषाढश्रावणभाद्रपदेषु सौरमानेन मिथुनकर्कटकसिंहमासेषु आचरणीयम् । कालमनुसृत्य एते उत्तममध्यमाधमाः भवन्ति । आषाढशुद्धद्वादशी स्वापकालारम्भतया प्रसिद्धः । सौरमाने ऊर्ध्वमिथुने द्वादश्यां विष्णुस्वापनकालः भवति । मिथुनमासे विधाविभक्ते चान्द्रमानेन ज्येष्ठमास भागः अधोमिथुनं आषाढमासे द्वितीयो भागः ऊर्ध्वमिथुनं भवति ।

**अधिकमास क्षयमासैः संयुते संवत्सरे पवित्रोत्सव कालनिर्णयः** - चान्द्रमानं व्यवहारार्थं सौरमान शुभकार्यार्थं उपयोज्यम् । सौरमानरीत्या मेषादि द्वादशनामभिः मासनामानि भवन्ति । नक्षेत्रेषु चन्द्रगतिमनुसृत्य पौर्णमास्यां चन्द्रस्थितिमनुसृत्य चैत्रादि नामानि भवन्ति ।

एवं मासद्वयेन ऋतुः ऋतुत्रयेण अयनं च भवति । उत्तरायणं दक्षिणायनं इति अयनद्वयम् ।

सौरमाने मकरादारभ्य मिथुनपर्यन्तं उत्तरायणम्। चान्द्रमाने माघमासादारभ्य आषाढ पर्यन्तं उत्तरायणम् । एवम् कर्कटकादारभ्य धनुषः पर्यन्तं सौरमाने दक्षिणायनम् । श्रावणादारभ्य पुष्यपर्यन्तं चान्द्रमाने दक्षिणायनम् । मेषादि मासत्रये एकस्मिन्नधिके कर्कटके विष्णोः स्वापकालः भवति । अनन्तर वत्सरे मिथुनमासे भवति । कर्कटकादि मासत्रये अधिकमासे जाते मिथुने स्वापकालः अनन्तर वत्सरे कर्कटके भवति । एकस्मात् अधिकमासादनन्तरं त्रिंशत् मासेषु अतीतेषु अष्टमः नवमो वा मासः अधिको भवति । चैत्रादि मासषट्के अधिकमासे जाते आषाढद्वयं भवति । 141 संवत्सरेषु अथवा एकोनविंशति (19) संवत्सरेषु वा क्षयमासो भवति । एकस्मिन् मासे क्षीणे अनन्तरमासः अधिको भवति । एकस्मिन् चान्द्रमानमासे संक्रमण द्वये क्षयमासो भवति । कार्तिकमार्गशिरपुष्यमासेषु अन्यतरः क्षीणो भवति । अस्माभिः दृष्टे काले 1969 वत्सरे पुष्यक्षीणः मार्गशिरश्च अधिकोऽभूत । एवं विधेषु मासेषु शुद्धपक्षे एव पवित्रोत्सवः करणीयः।

**शुक्लकृष्णपक्षयोः प्राशस्त्यम्** - आषाढमासे शुक्लपक्षे श्रावण भाद्रपदयोः, पक्षद्वये वा पवित्रोत्सवः सम्मत एव । भोगेच्छुभिः शुक्लपक्षे, मुमुक्षुभिः कृष्णपक्षे करणीयः इति शास्त्रोक्तिः ।

**योग्याः तिथयः** - आषाढमासे कृष्णपक्ष अष्टमी, श्रावण भाद्रपदयोः पक्षद्वये अष्टमी आषाढशुद्ध चतुर्दशी श्रावण भाद्रपदयोः पक्षद्वयेऽपि चतुर्दशी तिथयः योग्याः ।

**आह्निक विवरणम्** – (A) अष्टम्यां पवित्रसमर्पणं निश्चितं चेत्

1. साप्ताह्निकदीक्षा संकल्पिता चेत् द्वितीयायाः आरभ्य अष्टम्यां समाप्तिः ।
2.पाञ्चाह्निकाञ्चेत् चतुर्थ्याः आरभ्य अष्टम्यां समाप्तिः ।
3.त्र्याह्निके षष्ठ्याः आरभ्य अष्टमी पर्यन्तं
4. एकाह्निक चेत् सप्तम्याम् अष्टम्यां च कुर्यात्
5. सप्तम्यां गन्ध पवित्रसमर्पणं, अष्टम्यां नित्यपूजानन्तरं शुद्धपवित्र समर्पणं करणीयम् ।

(B) चतुर्दशी पवित्र समर्पण दिनार्थं निश्चिता चेत्

1.साप्ताह्निकं चेत् अष्टम्यामारभ्य चतुर्दश्यां समाप्तिः
2.पाञ्चाह्निके दशम्यामारभ्य चतुर्दशीपर्यन्तम्
3.त्र्याह्निकं चेत् द्वादश्यामारभ्य चतुर्दशी पर्यन्तम् ।
4.एकाह्निकं चेत् त्रयोदश्यां चतुर्दश्यां च करणीयम् ।
5.त्रयोदश्यां गन्ध पवित्र समर्पणं चतुर्दश्यां नित्यपूजा अनन्तरं शुद्धपवित्रसमर्पणम् ।

**खण्डतिथि विवरणम -** पवित्रसमर्पणे अष्टमी, चतुर्दशी च मुख्या तस्यां दिनद्वय व्याप्तायां द्वितीयं दिनं पवित्रसमर्पणार्थं ग्राह्यम् । एकाह्निके अष्टमीचतुर्दशी च सम्पूर्णा भवेत् ।

**इतरेषां देवानां पवित्रोत्सव तिथयः –**

| | | |
|---|---|---|
| 1.विष्णोः | – | पौर्णमासी, अमावास्या च |
| 2.अग्नेः | – | शुक्लपक्षपाड्यमी |
| 3.श्रीदेव्याः | – | द्वितीया |
| 4.इन्द्रस्य | – | तृतीया |
| 5.विनायकस्य | – | चतुर्थी |
| 6.चन्द्रस्य | – | पञ्चमी |
| 7.स्कन्दस्य | – | षष्ठी |
| 8.सूर्यस्य | – | सप्तमी |
| 9.दुर्गायाः | – | अष्टमी |
| 10.सप्तमातृणाम् – | नवमी | |
| 11.वायुदेवस्य | – | दशमी |
| 12.ऋषीणाम् | – | एकादशी |

विष्णोः कृष्णपक्षद्वादशी, शिवस्य कृष्णपक्षाष्टमी कृष्णचतुर्दशी, दुर्गायाः पञ्चमीद्वयं इत्यपि योग्याः तिथयः ।

**वर्ज्यकालः -** अधिकमासे क्षयमासे वा पवित्रोत्सवः न कार्यः । मासत्रये मौढ्य सम्भवेपि नित्याङ्गत्वात् योग्येषु मासेषु करणीय एव । दिनत्रय व्यापिनी तिथिः वर्जनीया ।

**कवौ गुरौ वास्तमयं प्रयातो मासत्रये ।**

**वाप्युदयो स चास्ति तदापि कुर्वीत पवित्रकार्यम् ।।**

**5.पवित्र निर्माणद्रव्यम् -** कौशेयं, कार्पासं, मौञ्जी पवित्रमिति पवित्रं त्रिधा भवति । कौशेयं सर्वैः दर्भमयं यतिभिः, अशक्तैः मौञ्जीकृतं धार्यम् ।

**6.पवित्रनिर्माणक्रमः -** ब्राह्मण स्त्रीभिः, तासामलाभे अन्यवर्णजाभिः पवित्रं निर्मेयम् । दारुशंकुषु त्रिवृत्सूत्रं त्रिः करणीयम् । एवं नव सूत्राणि सामान्य पवित्रस्य भवन्ति। नवानां सूत्राणां अधिदेवाः पृथक् भवन्ति । नवानां सूत्राणां अधिदेवाः क्रमेण यथा 1.ओंकारः 2.चन्द्रः 3.अग्निः 4.ब्रह्मा 5.नागः 6.गुहः 7.रविः 8.सदाख्या, 9.सर्वेदेवाः । एवं 1, 2, 3 त्रिमूर्तयः 4.ईश्वरः 5.सदाशिवः 6.सोमः 7.सूर्यः 8.अग्निः 9.सर्वेदेवाः इत्यधिदेवताः भवन्ति ।

**7.तत्त्वत्रय पवित्रलक्षणम्-** तत्त्वपवित्रं उत्तमम् –108, मध्यमम् –54, अधमम्–27 सूत्रयुक्तं भवति । नव दश वा ग्रन्थयः भवन्ति । द्व्यङ्गुलं चतुरखुलं द्वादशाङ्गुलं वा अन्तरं ग्रन्थमिध्ये भवति । द्वारदेवतादीनां अष्टसूत्रयुक्तं गुरोः आत्मनश्च नवतन्तुयुक्तं एकग्रन्थियुक्तं च पवित्रं भवति ।

**8.गङ्गावतारपवित्रलक्षणम् -** गङ्गावतार: इति नामकं पवित्रं अष्टोत्तरशत सूत्रयुक्तं पञ्चाशत् ग्रन्थियुक्तं अष्टादश सूत्रयुक्तं वा भवति । अन्तरं च द्व्यङ्गुलं चतुरङ्गुलं द्वादशाङ्गुलं वा भवति । एवं लिङ्गप्रमाणम् अनुसृत्य पवित्रस्य सूत्रभेद: ग्रन्थिभेदाश्च भवति। नवहस्त प्रमाण लिङ्गादारभ्य प्रत्येकं दश सूत्राणां चतुर्णां ग्रन्थीनां न्यूनत्वं भवति ।

| हस्तप्रमाणम् | सूत्रसंख्या | ग्रन्थिसंख्या |
|---|---|---|
| 9 | 108 | 50 |
| 8 | 98 | 46 |
| 7 | 88 | 42 |
| 6 | 78 | 38 |
| 5 | 68 | 34 |
| 4 | 58 | 30 |
| 3 | 48 | 26 |
| 2 | 38 | 22 |
| 1 | 28 | 18 |

स्वयंभुव: लिङ्गस्य अष्टादश ग्रन्थियुक्तं पवित्रं भवति । पवित्रमिदं लिङ्गस्य शिरस: आरभ्य पीठपर्यन्तम् विग्रहस्य चेत् शिरस: आरभ्य जानुपर्यन्तं लम्बनीयम् ।

**9.पवित्राधिदेवता: -** तत्त्वत्रयपवित्रविषये नव दश ग्रन्थय: वा भवेयु: । ग्रन्थिविषये । 1.प्रकृति: 2.पौरुषी 3.वीरा 4.अपराजिता 5.जया 6.विजया 7.अजिता 8.सदाशिव 9.मनोन्मनी 10.सर्वतोमुखी इति अधिदेवता: नवग्रन्थिविषये नवशक्तय: प्रणवादि नमोऽन्ता: आवाह्या:। ऊर्ध्वग्रन्थिविषये शिव: अधोग्रन्थे: शक्ति: । इतरेषु षोडशकला: आवाह्या: । 1.शशिनी 2.शाकिनी 3.लक्ष्मी: 4.कामिनी 5.प्रभा 6.पुष्पिणी 7.सुप्रभा 8.मुद्रा 9.कुमुदा 10.आदिवासी 11.शायिनी 12.विद्या 13.मोहिनी 14.प्रमोहिनी 15.सौम्या 16.अमृता इति षोडशकला:। अधिक ग्रन्थिविषये एतासामेव पुनरावृत्ति: करणीया ।

**10. वर्ज्यानि पवित्राणि-** मूषकग्रस्तानि, केशमिश्रितानि, अतिस्थूलानि, सूक्ष्माणि, रक्तानि, पशुभि: आघ्रातानि, छिन्नानि, वर्जनीयानि ।

**11.पवित्रालङ्करणम्-** पवित्रालङ्करणे गोरोजनमुत्तमम्, सिन्धूर मिश्रमम् मध्यमम्, हरिद्रामिश्रमम् अधमम्।

**12.यागशाला-** द्वादश सूत्रै: चतुर्दशषोडशसूत्रै: वा प्रमिता यागशाला षोडश स्तम्भनिर्मिता, षट्त्रिंशत् स्तम्भनिर्मिता चतुर्द्वारा मध्ये उन्नता । चतुर्दिक्षु निम्ना यागशाला भवेत् । होगकुण्डाश्च 1, 5, 9 योग्यदिक्षुषु योग्य: आकारै: निर्मेया: ।

**13.ऋत्विजां नियमा:**- पवित्रोत्सवकाले सर्वे ऋत्विज: त्रि: स्नानशीला: सन्ध्यानुष्ठान परायणा: क्षारलवणवर्जका:, नप्रोषिताश्च भवेयु:। उपवासयोग्येषु दिनेषु शिवप्रसादं आमलकप्रमाणं बदरीप्रमाणं वा भुञ्जीयु: ।

**14.प्रयोगक्रम:** - द्रव्यसाधनादिभि: प्रयोगक्रम: करणीय:। तत्स्वरूपं यथा –

**1.द्रव्यसाधनम्** - यावत् शक्ति यागसम्भाराणां सम्पादनम् ।

**2.पूर्वाङ्गम्** - पूर्वाङ्गे गणपतिपूजा, पुण्याहवचनम्, वास्तुशान्ति इति क्रियात्रयं करणीयम् ।

**3.पवित्राधिवासदिन कर्तव्यम्**- कुम्भालङ्करणादारभ्य पवित्राधिवास पर्यन्तं इमा: क्रिया: करणीया: a.कुम्भालङ्कार: b.मृत्संग्रहणम् c.अङ्कुरारोपणम् d.यागमण्डपस्थापनम्, e.अग्निकार्यम् इति क्रिया: करणीया: ।

**4. स्थालीपाक: चरुविभागश्च** - होमकुण्डे अग्निविभाग काले एव पाकनिमित्तमपि अग्नि: विभाज्य: तस्मिन् अग्नौ चरु: पचनीय: सिद्धं चरुं त्रिधा विभज्य प्रथमभागं शिवार्थम्, द्वितीयं अग्नये, तृतीयं आचार्यार्थं उपयुक्तं करणीयम् । प्रथमभाग: अपि यागेश्वर, यागेश्वरी, मण्डलेश्वर, मूललिङ्ग व्रताङ्गचरुपाकरूपेण विभाज्य: । द्वितीय: अग्निरूपाय शिवाय पवित्रसमर्पणे होमार्थं देवेभ्य: बलिहरणार्थं विभज्य उपयोज्य: । तृतीयो आचार्यभाग: गुरुशिष्यै: समभागरूपेण स्वीकार्य: ।

**5.बलिनिक्षेपणम्** - होमकुण्डपार्श्वे बलिहरणं मण्डलद्वये समर्पणीयम् ।

**6.पवित्रपूजा** - समर्पणीयाणि गन्धपवित्र, शुद्धपवित्र गङ्गावतारपवित्राणि करण्डेषु स्थापयित्वा पुण्याहेन मार्जितानि कृत्वा गन्धोदकेन प्रोक्ष्य सुगन्धालङ्कृतानि कृत्वा महावेदिका समीपे मण्डले स्थापयित्वा तेषु देवता: आवाह्य अभिमन्त्रणं कुर्यात् । तत: दन्तकाष्ठादि द्रव्याणि मण्डले निधाय सम्पूज्य मूलमूर्तिं दर्शयेत् ।

**7.शालंगदेवता - आलयस्थित देवता - अग्निकार्योक्त देवेभ्य: गन्धपवित्र समर्पणम्**- शालायां स्थितानां कलशाधिष्ठान देवतानां गन्धपवित्रं समर्प्य आलयस्थितेभ्य:, अग्निस्थितेभ्य: बल्यधिष्ठानदेवेभ्य: गन्धपवित्रसमर्पणं कृत्वा नीराजनं देयम् ।

**8.सूत्रबन्धनं पवित्ररक्षा**- पवित्राधिवाससमये सर्वेषां पवित्राणां समेतानां रक्षाबन्धनं कार्यम् । यागशाला देवतानां आलयस्थ देवतानां पृथक् रक्षाबन्धनं करणीयम् । धारणसमये पवित्ररक्षां विस्रस्य स्वामिने पवित्रमर्पयेत् ।

**9.द्वितीयदिने पवित्राधिवासनानन्तरं कर्तव्यविधि:**- यागशालपूजाया: आरभ्य पवित्रसमर्पण पर्यन्ता: क्रतव: पुन: करणीया: ।

**सूर्यादि यागशालपूजा**- यागशालायां सूर्यादि देवता: पूजयित्वा शुद्धिपञ्चकं कृत्वा प्रधानवेदिका स्थिता: मण्डलस्थ कुम्भस्थ देवता: पूजनीया: ।

**अग्निकार्यम्** - पूर्वस्मिन्न दिने संस्कृते शिवाग्नौ मूलमन्त्रादि होमान् जुहुयात् ।

**10.तत्त्व पवित्र समर्पणम्** - शालाङ्गदेवताभ्य: तत्त्वपवित्रं समर्प्य आलयस्थ देवेभ्य: यथाविधि पत्रशुद्धी: कृत्वा तत्त्वत्रयमुच्चरन् लिङ्मूर्धनि पवित्राणि समर्पयेत् । तत: भोग: भवति । मुमुक्षुभि: शिवादितत्त्वानि स्मरणीयानि । तत: गङ्गावतारपवित्रं **सर्व तत्त्वाधिपतये शिवाय नम:** इति जपन् धारयेत्। तत्त्वपवित्रं समर्प्य व्रतचर्यानन्तरं नीराजनं देयम् । तत: कुण्डस्थ देवताभ्य: बल्यधिष्ठानदेवताभ्य: पवित्रसमर्पणं करणीयम् । तत: आचार्यादि ऋत्विज: पवित्राणि धारयेयु: ।

**11.यागविसर्जनम्** - शालायां देवता: पूजयित्वा निवेदनं दत्वा उद्यापनं वाच्यं आलये देवानां पुन: पूजां कृत्वा, पवित्राणि अपनीय चण्डेश्वरं पूजयित्वा, पवित्रसमर्पणं कृत्वा, क्षमापणं प्रार्थनीयम् ।

**12.मूलमन्त्रजप:** - पूजावसाने कनिष्क संख्यया 1008 अथवा यथाशक्ति जप्त्वा फलं देवाय अर्पणीयम् ।

**13.महाशान्तिहोम:** - उत्सवे ज्ञातानामज्ञातानां क्रियालोप मन्त्रद्रव्यादि लोपशान्तये सम्पूर्णफलप्राप्तये आगमोक्तदिशा शान्ति होम: करणीय: ।

**14.भोजनविधि:** - आचार्य ऋत्विग्भ्य: भोजनं दत्वा इतरानपि भोजयेत् ।

**15.धारणकालनियमा:** - पवित्रधारणानन्तरं 4-3-2-1 मासान् 15-9-7-5-3 दिनानि पवित्राणि तथैव धारणीयानि । अशक्त: चेत् एकाहमपि स्थापनीयानि ।

**16.देव्यालये पवित्रोत्सव:** - देव्या: पृथगालय: वर्तते चेत् प्रत्येकं पवित्रोत्सव: अनुष्ठेय: द्वयो: सन्निधाने उभयो: यौगपद्येन भवति ।

**17.पवित्रोत्सवफलम्** - पवित्रोत्सवकरणेन नित्यविधौ लोपा पूर्णा: भवन्ति । लोपाभावेपि दोषशान्ति: सर्वयज्ञफलं, लोकोपद्रवशान्तिश्च भवति ।

**18.अकरणे प्रायश्चित्तम्-** आषाढादि नियतकालेषु अकृते पतित्रोत्सवे ग्रामयजमानाचार्यार्चकाणां दोष: भवति । आलये क्रियमाणा: पूजा: निष्फला: भवन्ति । तत: तत् शान्तये दिशा होमं हुत्वा इष्टे मासे पवित्रोत्सव: करणीय: ।

**19.पवित्रोत्सव समर्पणाय प्रधानश्लोका: मन्त्रा:च** - पवित्रोत्सव प्रक्रिया महती श्रेष्ठा चा तस्मिन् उत्सवे पवित्र समर्पणे पठनीया: मन्त्रा: श्लोका: च अत्रोदाहृता: प्रयोक्तृभि: मुखस्था: कृताश्चेत् प्रयोग: सुलभानुष्ठेयो भवति ।

समर्पणे प्रधानश्लोका:, मन्त्राश्च –

**गंधपवित्रश्लोका:**

वर्षायनन्तु पक्षाहर्नाडिप्राणादिविग्रहम् ।
सर्वेंद्रिय शरीरार्धं व्यवहारैककारणम् ।। 1
कृताकृत समुत्सृष्टं क्लिष्टं कर्मैकसाक्षिणम् ।
क्षेत्रगोप्तारमीशानं सरण्यं शुचिमानसम् ।। 2

**महापवित्रश्लोका:**

**आमंत्रणपदात्मकं मन्त्रं पठेत्-**

ओं समस्त विधिवच्छित्ति पूरणाय मखं प्रति ।
प्रभावान्मंत्रयामि त्वां त्वदिच्छाव्याप्तिकारकम् ।। 1
तत्सिद्धिमनुजानीहि यजतश्चिदचित्पते ।
सर्वथा सर्वदा शंभो नमस्तेऽस्तुप्रसीद मे ।। 2

आमंत्रितोऽसि देवेश सह देव्या गणेश्वरैः ।

मंत्रेशैर्लोकपालैश्च सहितः परिवारकैः ।। 3

निवेदयाम्यहं तुभ्यं प्रभाते तु पवित्रकम् ।

नियमं च करिष्यामि परमेश! तवाज्ञया ।। 4

सद्योऽधिवासकृत्सद्यःकाले पवित्रकमिति पठेत् ।

वर्षायनन्तु पक्षाह......... शुचिमानसं पवित्राणि समादाय, धूपयन्, किंचित्कलशसम्मुखो विज्ञापयेत्।

**विज्ञापनम्**

कालात्मना त्वया देव यदिष्टं मामके विधौ ।

कृतं क्लिष् समुत्सृष्टं हृतं गुप्तमसंस्तृतम् ।। 1

तदनु क्लिष्टमक्लिष्टं कृतं क्लिष्टमसंस्कृतम् ।

सर्वात्मना त्वया शंभो पवित्रेण त्वदिच्छया ।। 2

ओं पूरय पूरय मखव्रतनियमेश्वराय स्वाहा इत्युच्चार्य, माया त्वान्तव्याप्तिके ब्रह्मकारणपालिते आत्मतत्त्वे – ओं हां हं हां आत्मतत्त्वाधिपतये शिवाय स्वाहेति मायान्तमुच्चार्य, ईश्वरान्तमुच्चार्य, शिवत्त्वान्तव्याप्तिके रुद्रकारणपालिते शिवत्त्वे ओं हां हं हां शिवत्त्वाधि पतये शिवाय स्वाहेति शिवान्तमुच्चार्य, एवं क्रमेण दूर्वाक्षतोपेतं लिंगमूर्ध्नि पवित्रकं दद्यात् ।

पश्चात् सर्वकारणपालिते सर्वत्त्वे ओं हां हौं हां सर्वतत्त्वाधिपतये शिवाय स्वाहेति लयान्तमुच्चार्य, सर्वतत्त्वात्मकं गंगावतारकं दत्वा, पुष्पांजलिपुटोभूत्वा, भक्त्या विज्ञपयेत् ।

त्वंगतिस्सर्वभूतानां संस्थितस्त्वं चराचरे ।

अन्तश्चारेण भूतानां दृष्टस्त्वं परमेश्वर! ।।

कर्मणा मनसा वाचा त्वत्तो नाऽन्यो गतिर्मम ।

मंत्रहीनं क्रियाहीनं द्रव्यहीनं च यत्कृतम् ।।

जपहोमार्चनाहीनं कृतं नित्यं मया तव ।

अकृतं वाक्यहीनं च तत्पूरय महेश्वर ।।

सुपूतस्त्वं सुरेशान पवित्रं पापनाशनम् ।

त्वया पवित्रितं सर्वं जगत् स्थावर जंगमम् ।।

खंडितं यन्मया देव व्रतं वैकल्ययोगतः ।

एकीभवतु तत्सर्वं तवाजाञ सूत्रशोभितम् ।।

**चंडनाथपवित्रम् -**

यत्किंचित् वार्षिकं कर्मकृतं न्यूनाधिकं मया ।

तदसुत परिपूर्णं मे चण्डनाथ तवाज्ञया ।।

तुष्टेन गुरुनाथेन तुष्टो भवति शंकरः ।

संग्रहं सफलं तस्यक्रियाकांडादि वार्षिकम् ।।
यस्य तुष्टो गुरुस्सम्यगित्याह परमेश्वर: ।।

मूलमन्त्रा: –

ओं गं ग्लां गौ: गणपतये स्वाहा
ओं हौं सदाशिवाय स्वाहा
ओं हां महेश्वराय स्वाहा
ओं ह्लीं विष्णवे स्वाहा
ओं ह्लां ब्रह्मणे स्वाहा
ओं ह्रां ह्रीं स: शिवसूर्याय स्वाहा
ओं सौं शरवणभवाय षण्मुखाय स्वाहा
ओं तुंबुरु तुंबुरु आनन्दतांडवेश्वराय स्वाहा
ओं श्रीं ह्रीं वीरभद्राय स्वाहा
ओं जुं स: ओं ह्रीं वं कुरु कुरु वटुकाय आपदोद्धारणाय स्वाहा
ओं व्योमव्यापिने व्योमरूपाय नीलकंठाय स्वाहा
ओं सोमस्कन्देश्वराय स्वाहा
ओं हीं रं पराशक्तये स्वाहा
ओं हूं भुवनेश्वर्यै स्वाहा
ओं ह्रीं मनोन्मन्यै स्वहा

**उपसंहार: –** अद्यावधि धर्मरक्षणार्थं आधारभूतेषु आलयेषु व्याख्यातानां शैवागमानां क्रियापादान्तर्गतानां पवित्रोत्सवविधिनामनुष्ठानविधि: अघोरशिवाचार्योक्त मार्गेण निरुपित: । तं विधिं ज्ञात्वा पवित्रोत्सवावसरं, पवित्रभेदान्, अधिवासविधीन, प्रयोगविधीन् शुद्धपवित्रगङ्गावतारपवित्र समर्पण विधीन् अधिकृत्य विशेषां अपि अस्माभि: ज्ञाता: । पवित्रोत्सवसमर्पणे प्रतिसंवत्सरं क्रियमाणे, नित्यक्रियादिषु द्रव्यमन्त्रक्रिया भावलोपै: जातानां दोषाणां निवारणम् अपि पवित्रोत्सव निर्वहणेन भवति । अपि च सम्पूर्णपूजा फलप्रप्ति: तन्मुखेन लोकक्षेममपि भविष्यति इति शास्त्राणां सिद्धान्त: । इमं विधिन् अनुसृत्य प्रतिदोवालयं पवित्रोत्सव: करणीय: इति आशास्यते ।

**उपयुक्तग्रन्थसूची**

1. 1.अघोरशिवाचार्य पद्धति: 2 पटल:
2. (Edit by -Gnanasambandha Parasakthi Swami, Published by- Gnanasambanda Mudhrakshara Sala, Chidambaram, 1927)

3. 2.अंशुमदागम: 43 पटल:
4. (Edit by - Sri Rarathna Sivacharyar, Edication, Research and Charitable Trust, Digitial Library)
5. 3.अचिंत्यविश्वसादाख्यागम: 61 पटल:
6. (Edit by -C.H.Pavan Vamsi Sri, Ph.d Theeses, S.V.Vedic University, Tirupati-2021)
7. 4.उत्तरकामिकागम: 18 पटल:
8. (दक्षणभारत अर्चकसंघ संचालकै:, श्री.चे. स्वामिनाथ शिवाचार्यै: प्रकाशित: । दक्षिणभारत अर्चकसंघ:(रिजिष्टर्ड् 39-1950) 24 बद्रय्यन् वीथी, मद्रास्, 1988)
9. 5.कारणागम: 12 पटल:
10. (दक्षणभारत अर्चकसंघ संचालकै:, श्री.चे. स्वामिनाथ शिवाचार्यै: प्रकाशित: । दक्षिणभारत अर्चकसंघ:(रिजिष्टर्ड् 39-1950) 24 बद्रय्यन् वीथी, मद्रास्, 1988)
11. 6.किरणागम: 6 पटल:
12. (संपादक:-तत्पुरुषपंचापकेश शिवाचार्य:, तिरुवय्यारु क्षेत्रं, प्रकाशक:- शिवागम सिद्धान्तपरिपालना संघम्, देवकोट्टै-1932)
13. 7.दीप्तागम: 58 पटल:
14. (Edit by - Marie-Luce, Barzer -Billoret, Bruno-Dagenset Vincent Lefevre, S. Sambandha Sivacharya Published by - by Instutute Francais De Pandichery - 2004)
15. 8.मकुटागम: 11 पटल:
16. (Edit by - C. Swaminatha Gurukkul, Published by -South India Archakar Assiciation, Madras -1989)
17. 9.योगजागम: 13 पटल:
18. (Edit by P. Neelakantam, Ph.D Theeses, R.S.V.P, Tirupati - 2017)
19. 10.रौरवागम: 25 पटल:
20. (Edit by N.R. Bhatt, Published by Instutute Francais De Pandichery - 1961)
21. 11.सहस्रागम: 26 पटल:
22. (Edit by- S.Sambanda Sivacharya, Vedagama Samskrutha Maha Patasala, Sri Sri Gurukul, Bangalore-2014)
23. 12.सुप्रभेद: 7 पटल:
24. (Edited by -Sabha Natesha Sivacharyaha, Published by- Sabha Natesha Sivacharyaha - 1979)

25. 13.सूक्ष्मागम: 16, 25
26. (Edit by – S.Sambanda Sivacharya, B. Dagems, M.L, Barzer – Billoret and T. Ganesan, Published by Instutute Francais De Pandichery– 2012)
27. 14.शैवकाल विवेक: पवित्रोत्सवकाल:
28. (Edit by – k. Seetharama Somayaji, Mysure, Published by– Talakadu Aagamika Krishna Deekshith, Manonmani Granthamala, Bangolure –1966), (Second Print– M.Seetharama sastri, Published by S.V.Vedic University, Tirupati – 2015)
29. 15.सिद्धन्तसारावळि चर्यापाद: सौरचांद्र पवित्रकालनिर्णय:
30. (Edited by– P. Neelakantam, Published by – Sankara Vedagama Sanathana Dharma Seva Trust – 2020)